NEWJOBSINFO.IN A PATH FOR BRIGHT FUTURE

CLASS : 10th (Secondary) **Code No. 3508**

**Series : Sec. M/2018**

रोल नं०

***SET : A***

# संस्कृत

*(Academic/Open)*

(Only for Fresh/Re-appear Candidates)

## शेमुषी (नई पुस्तक)

*समय : 3 घण्टे ]* *[ पूर्णांक : 80*

---

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न 16 हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

---

*निर्देश :* –

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

### खण्डः 'क'

### (अपठित–अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा अधस्तानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $4 \times 2 = 8$

प्रकृतिः मनुष्यस्य उपकारिणी। मनुष्यैः सह तस्याः शाश्वतः सम्बन्धः। सा विविधरूपेषु अस्मिन् जगति आत्मानं प्रकटयति। विविधाः ओषधयः सकलानि खनिजानि च प्रकृतेः एव शोभाः। सा तु नित्यं एव एतैः साधनैः सर्वेषाम् उपकारं करोति, परं अधन्यः जनः अस्यां कृतज्ञतां विधाय असाधुसेवितं पथं गच्छति।

*प्रश्नाः –*

(क) कस्याः शाश्वतः सम्बन्धः मनुष्यैः सह अस्ति ?

(ख) प्रकृतिः विविधरूपेषु आत्मानं कुत्र प्रकटयति ?

(ग) प्रकृतिः कस्य उपकारिणी अस्ति ?

(घ) अधन्यः जनः कृतज्ञतां विहाय किं करोति ?

NEW JOBS INFO.IN A PATH FOR BRIGHT FUTURE

### खण्डः 'ख'

### (रचनात्मकं कार्यम्)

**2.** (क) विकासः 'छात्रावास-जीवन' विषये पितरम् प्रति पत्रमेकम् लिखति। मञ्जूषातः पदानि विचित्य पत्रे रिक्तस्थानानि पूरयन्तु –

$4 \times 1 = 4$

परीक्षाभवनम्

तिथिः

पूज्यपाद पितः !

सादरं (i) ..........। अहं गृहात् प्रस्थाय (ii) .......... रेलयानात् अवतीर्य छात्रावासम् सुखेन प्राप्तः। अस्मिन् कक्षे वायोः (iii) .......... चागमनाय वातयानानि तिष्ठन्ति। अत्र पानाशनयोः (iv) .......... । चिन्ता न कार्या। मातृपादयोः प्रणामः अस्तु।

भवदीयः पुत्रः

विकासः

**मञ्जूषा**

| सुप्रबन्धः, प्रकाशस्य, नमो नमः, अमृतसरनगरे। |
|---|

(ख) निर्दिष्टं चित्रं दृष्ट्वा प्रदत्तवाक्यानि पठित्वा च मञ्जूषाप्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयित्वा लिखत – 4 × 1 = 4



*प्रश्नाः –*

(i) इदं उद्यानस्य ........... अस्ति।

(ii) बालकः ........... सह क्रीडति।

(iii) अत्र वृक्षौ ...........।

(iv) एका बालिका रज्ज्वा...........।

**मञ्जूषा**

| क्रीडति, मित्रैः, स्तः, चित्रम्। |
|---|

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**3.** अधोनिर्दिष्टगद्यांशस्य हिन्दीभाषायां सरलार्थः लेखनीयः – $1 \times 4 = 4$

**जम्बुकः** = यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्। सः व्याघ्रः तथाकृत्वा काननं ययौ। शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती ...........।

NEW JOBS INFO.IN A PATH FOR BRIGHT FUTURE

अथवा

कश्चिद् राजा स्वमनसि निरन्तरं प्रवर्तमानायाः जिज्ञासायाः समाधानाय कस्मिंश्चिदाश्रमे निवसतो मुनेः पार्श्वमुपागच्छत्।

**4.** अधोनिर्दिष्टश्लोकस्य हिन्दीभाषायां सरलार्थः लेखितव्यः – $1 \times 4 = 4$

श्रमक्लमपिपासोष्ण-शीतादीनां सहिष्णुता।

आरोग्यं चापि परमं व्यायामादुपजायते।।

**अथवा**

संपत्तौ च विपत्तौ च महतामेकरूपता।

उदये सविता रक्तौ रक्तश्चास्तमये तथा।

**5.** अधस्तनसूक्तिषु ***द्वयोः*** भावार्थः स्पष्टयितव्यः – 2 × 2 = 4

(क) समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात्।

(ख) विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।

(ग) निहन्यन्ते च विवशाः प्राणिनः।

(घ) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

**6.** अधः प्रदत्तं गद्यांशं सम्पठ्य निर्दिष्ट-प्रश्नोत्तराणि संस्कृतेन लेखितव्यानि – 3 × 1 = 3

NEWS INFO.IN A PATH FOR BRIGHT FUTURE

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरे प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अग्रहणाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत 'चौरोऽयं चौरोऽयम्' इति।

***प्रश्नाः*** –

(क) गृहाभ्यन्तरे कः प्रविष्टः ?

(ख) अतिथिः केन प्रबुद्धः ?

(ग) 'चौरोऽयं चौरोऽयम्' इति कः क्रोशितुं आरभत ?

**7.** अधोनिर्दिष्टं श्लोकं पठित्वा प्रदत्तप्रश्नयोः उत्तरे संस्कृतेन लेखितव्ये –

$2 \times 1 = 2$

एकेन राजहंसेन या शोभा सरसो भवेत्।

न सा बकसहस्रेण परितस्तीरवासिना।।

*प्रश्नाः* –

(क) सरः केन शोभते ?

(ख) कीदृशेन बकसहस्रेण सरः न शोभते ?

**8.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $3 \times 1 = 3$

(क) उद्याने पक्षिणां कलरवं चेतः प्रसादयति।

(ख) तया अस्य शयनस्य व्यवस्थापि कृता।

(ग) अलम् अतिविस्तरेण।

NEW JOBS INFO.IN A PATH FOR BRIGHT FUTURE

**9.** प्रश्नपत्रे लिखितान् श्लोकान् विहाय 'शेमुषी भाग-2' स्वपाठ्य- पुस्तकात् ***एकं*** श्लोकं संस्कृतभाषायां लिखत। $1 \times 4 = 4$

**खण्डः 'घ'**

**(अनुप्रयुक्त–व्याकरणम्)**

**10.** (क) व्यञ्जनसन्धेः ***अथवा*** विसर्गसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ख) अव्ययीभावसमासस्य ***अथवा*** द्विगुसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ग) करणकारकस्य ***अथवा*** अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

**11.** अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत –

3 × 1 = 3

(क) बालकं ............. ताडय। (मा / च)

(ख) भवान् ............. कथम् आयातः। (अहर्निशम् / चिरं)

(ग) ............. कोऽस्ति। (बहिः / अलम्)

**12.** प्रदत्तोपपदविभक्ति-वाक्येषु उचितंविभक्तिप्रयोगं कुरुत –

4 × 1 = 4

(क) नृपः ............. गच्छति। (नगरं / नगरस्य)

(ख) सः ............. कटुः अस्ति। (स्वभावाय / स्वभावेन)

(ग) ............. स्वस्ति। (नृपं / नृपाय)

(घ) सः ............. निपुणः अस्ति। (रामात् / रामेण)

**13.** यथानिर्दिष्टं शब्दरूपाणि लिखत – 4 × 1 = 4

NEW JOBS INFO
A PATH FOR BRIGHT FUTURE

(क) 'राम' शब्दस्य तृतीया-एकवचने।

(ख) 'लता' शब्दस्य षष्ठी-एकवचने।

(ग) 'नदी' शब्दस्य द्वितीया-बहुवचने।

(घ) 'अस्मद्' शब्दस्य षष्ठी-एकवचने।

**14.** यथानिर्दिष्टं धातुरूपाणि लिखत – 4 × 1 = 4

(क) 'पठ्' धातु, लट्लकारः, म० पु०, एकवचने।

(ख) 'गम्' धातु, लृट्लकारः, प्र० पु०, एकवचने।

(ग) 'भू' धातु, लङ्लकारः, उ० पु०, बहुवचने।

(घ) 'अस्' धातु, लङ्लकारः, प्र० पु०, द्विवचने।

**15.** अधोलिखितेभ्यः क्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत –

3 × 1 = 3

(क) सुगमः।

(ख) अधिगच्छति।

(ग) प्रतिवदति।

NEW JOBS INFO.IN A PATH FOR BRIGHT FUTURE

**खण्डः 'ङ'**

**(बहुविकल्पीय प्रश्नाः)**

**16.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्त वैकल्पिकचतुर्षु उत्तरेषु ***एकं*** शुद्धम् उत्तरं लिखत – 16 × 1 = 16

(क) 'गावः + च' अत्र किं सन्धियुक्तपदम् ?

(i) गावश्च

(ii) गाश्च

(iii) गावच

(iv) गौश्च

(ख) 'स्वागतम्' इति पदे कः सन्धिविच्छेदः ?

(i) सु + वागतम्

(ii) सव + गतम्

(iii) सु + आगतम्

(iv) स्व + आगतम्

(ग) 'राजपुरुषः' इति पदस्य विग्रहम् किम् ?

(i) राज्ञा पुरुषः

(ii) राज्ञः पुरुषः

NEW JOBS INFO.IN A PATH FOR BRIGHT FUTURE

(iii) राज पुरुषः

(iv) राज्ञ पुरुषः

(घ) 'उपनदि' इति पदे कः समासः ?

(i) द्वन्द्व

(ii) बहुव्रीहि

(iii) द्विगु

(iv) अव्ययीभाव

(ङ) 'दुर्लभः' इति पदस्य विलोमशब्दः किम् ?

(i) सुलभः

(ii) सुखदः

(iii) सुकरः

(iv) दुर्लभा

(च) 'दोषः' इति पदस्य विलोमपदम् किम् ?

(i) गुणाः

(ii) गुणः

(iii) दोषाः

(iv) दोषः

NEW JOBS INFO.IN
A PATH FOR BRIGHT FUTURE

(छ) 'सलिलम्' इति पदस्य पर्यायपदम् किम् ?

(i) रसातलम्

(ii) तक्रम्

(iii) जलम्

(iv) पाषाणम्

(ज) 'नगरम्' इति पदस्य पर्यायपदम् किम् ?

(i) वनम्

(ii) उपवनम्

(iii) काननम्

(iv) पत्तनम्

(झ) 'समाज + ठक्' इति संयोगे किं रूपम् ?

(i) समाजी

(ii) समाजिकः

(iii) समाजठक्

(iv) सामाजिकः

(ञ) 'दातव्यम्' इति पदे कः प्रत्ययः ?

NEW JOBS INFO.IN
A PATH FOR BRIGHT FUTURE

(i) तव्यत्

(ii) क्त

(iii) अनीयर्

(iv) क्त्वा

(ट) 'पञ्चविंशति' इति पदे का संख्या ?

(i) 35

(ii) 25

(iii) 15

(iv) 45

(ठ) '30' इति पदे किं संख्यावाचीपदम् ?

(i) विंशतिः

(ii) त्रिंशत्

(iii) विशतीः

(iv) चतुर्विंशति

(ड) 'अतिदीर्घः प्रवासः' अत्र किं विशेष्यपदम् ?

(i) अतिदीर्घः

(ii) प्रवासः

NEW JOBS INFO.IN A PATH FOR BRIGHT FUTURE

(iii) अति

(iv) दीर्घः

(ढ) 'उदात्तरम्यः समुदाचारः' अत्र किं विशेषणपदम् ?

(i) उदात्तरम्यः

(ii) समुदाचारः

(iii) उदात्त

(iv) रम्यः

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत –

(i) बालकः प्रातः ............ वादने उत्तिष्ठति।




(ii) अहं प्रातः ............. भ्रमणाय गच्छामि।




NEW JOBS INFO.IN
A PATH FOR BRIGHT FUTURE